# .. bhagavatyaShTakam ..

## ॥ भगवत्यष्टकम् ॥

नमोऽस्तु ते सरस्वति त्रिशूल-चक्र-धारिणि सिताम्बरावृते शुभे
मृगेन्द्रपीठसंस्थिते ।
सुवर्णबन्धुराधरे सुझल्लरीशिरोरुहे सुवर्णपद्मभूषिते नमोऽस्तु
ते महेश्वरि ॥ १॥
पितामहादिभिर्नुते स्वकान्तिलुप्तचन्द्रभे सरत्नमालयावृते
भवाब्धिकष्टहारिणि ।
तमालहस्तमण्डिते तमाल-भाल-शोभिते गिरामगोचरे इले नमोऽस्तु
ते महेश्वरि ॥ २॥
स्वभक्तवत्सलेऽनघे सदापवर्गभोगदे दरिद्र-दुखहारिणि
त्रिलोकशंकरीश्वरि ।
भवानि भीम अम्बिके प्रचण्डतेज-उज्ज्वले भुजाकलापमण्डिते नमोऽस्तु
ते महेश्वरि ॥ ३॥
प्रपन्नभीतिनाशिके प्रसूनमाल्यकन्धरे धियस्तमोनिवारिके
विशुद्धबुद्धिकारिके ।
सुरार्चिताऽङ्घ्रिपंकजे प्रचण्डविक्रमेऽक्षरे विशालपद्मलोचने
नमोऽस्तु ते महेश्वरि ॥ ४॥
हतस्त्वया स दैत्यधूम्रलोचनो यदा रणे तदा
प्रसूनवृष्टयस्त्रिविष्टपे सुरैः कृताः ।
निरीक्ष्य तत्र ते प्रभामलज्जत प्रभाकर- स्त्वयि दयाकरे ध्रुवे
नमोऽस्तु ते महेश्वरि ॥ ५॥
ननाद केसरी यदा चचाल मेदिनी तदा जगाम दैत्यनायकः स्वसेनया
द्रुतं भिया ।
सकोप-कम्पदच्छदे सचण्ड-मुण्डघातिके मृगेन्द्रनादनादिते
नमोऽस्तु ते महेश्वरि ॥ ६॥
कुचन्दनार्चितालके सितोष्णवारणाधरे सवर्करानने वरे
निशुम्भ-शुम्भ-मर्दिके ।
प्रसीद चण्डिके अजे समस्त-दोषघातिके शुभामतिप्रदेऽचले नमोऽस्तु
ते महेश्वरि ॥ ७॥
त्वमेव विश्वधारिणी त्वमेव विश्वकारिणी त्वमेव सर्वहारिणी न
गम्यसेऽजितात्मभिः ।
दिवौकसां हिते रता करोषि दैत्यनाशन शताक्षि रक्तदन्तिके
नमोऽस्तु ते महेश्वरि ॥ ८॥

पठन्ति ये समाहिता इमं स्तवं सदा नराः अनन्यभक्तिसंयुताः
अहर्मुखेऽनुवासरम् ।
भवन्ति ते तु पण्डिताः सुपुत्रधान्य-संयुताः कलत्रभूतिसंयुता
व्रजन्ति चाऽमृतं सुखम् ॥ ९॥
॥ इति श्रीमन्नरदासविरचितं भगवत्यष्टकं समाप्तम् ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org